श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुःपञ्चाशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुःपञ्चाशः सर्गः ॥

## राज्ञा नृगेण स्वपुत्राय राज्यं दत्त्वा भूमौ रुचिरं गर्तं निर्माण्य तत्र प्रविश्य शापस्योपभोगकरणम्

रामस्य भाषितं श्रुत्वा लक्ष्मणः परमार्थवित्।
उवाच प्राञ्जलिर्वाक्यं राघवं दीप्ततेजसम्॥ **7.54.1** ॥

अल्पापराधे काकुत्स्थ द्विजाभ्यां शाप ईदृशः।
महान् नृगस्य राजर्षेर्यमदण्ड इवापरः॥ **7.54.2** ॥

श्रुत्वा तु पापसंयुक्तमात्मानं पुरुषर्षभ।
किमुवाच नृगो राजा द्विजौ क्रोधसमन्वितौ॥ **7.54.3** ॥

लक्ष्मणेनैवमुक्तस्तु राघवः पुनरब्रवीत्।
शृणु सौम्य यथा पूर्वं स राजा शापविक्षतः॥ **7.54.4** ॥

अथाध्वनि गतौ विप्रौ विज्ञाय स नृपस्तदा।
आहूय मन्त्रिणः सर्वान् नैगमान् सपुरोधसः॥ **7.54.5** ॥

तानुवाच नृगो राजा सर्वाश्च प्रकृतीस्तथा।
दुःखेन सुसमाविष्टः श्रूयतां मे समाहिताः॥ **7.54.6** ॥

नारदः पर्वतश्चैव मम दत्त्वा महद्भयम्।
गतौ त्रिभुवनं भद्रौ वायुभूतावनिन्दितौ॥ **7.54.7** ॥

कुमारोऽयं वसुर्नाम स चेहाद्याभिषिच्यताम्।
श्वभ्रं च यत् सुखस्पर्शं क्रियतां शिल्पिभिर्मम॥ **7.54.8** ॥

यत्राहं सङ्क्षयिष्यामि शापं ब्राह्मणनिःसृतम्।
वर्षघ्नमेकं श्वभ्रं तु हिमघ्नमपरं तथा॥ **7.54.9** ॥

ग्रीष्मघ्नं तु सुखस्पर्शमेकं कुर्वन्तु शिल्पिनः।
फलवन्तश्च ये वृक्षाः पुष्पवत्यश्च या लताः॥ **7.54.10** ॥

विरोप्यन्तां बहुविधाश्छायावन्तश्च गुल्मिनः।
क्रियतां रमणीयं च श्वभ्राणां सर्वतोदिशम्॥ **7.54.11** ॥

सुखमत्र वसिष्यामि यावत्कालस्य पर्ययः।
पुष्पाणि च सुगन्धीनि क्रियन्तां तेषु नित्यशः॥ **7.54.12** ॥

परिवार्य यथा मे स्युरध्यर्धं योजनं तथा।
एवं कृत्वा विधानं स सन्निवेश्य वसुं तदा॥ **7.54.13** ॥

धर्मनित्यः प्रजाः पुत्र क्षत्रधर्मेण पालय।
प्रत्यक्षं ते तथा शापो द्विजाभ्यां मयि पातितः॥ **7.54.14** ॥

नरश्रेष्ठ सरोषाभ्यामपराधेऽपि तादृशे।
मा कृथास्त्वनुसन्तापं मत्कृते हि नरर्षभ॥ **7.54.15** ॥

कृतान्तः कुशलः पुत्र येनास्मि व्यसनीकृतः।
प्राप्तव्यान्येव प्राप्नोति गन्तव्यान्येव गच्छति॥ **7.54.16** ॥

लब्धव्यान्येव लभते दुःखानि च सुखानि च।
पूर्वे जात्यन्तरे वत्स मा विषादं कुरुष्व ह॥ **7.54.17** ॥

एवमुक्त्वा नृपस्तत्र सुतं राजा महायशाः।
श्वभ्रं जगाम सुकृतं वासाय पुरुषर्षभ॥ **7.54.18** ॥

**एवं प्रविश्येव नृपस्तदानीं**
**श्वभ्रं महद्रत्नविभूषितं तत्।**
**सम्पादयामास तदा महात्मा**
**शापं द्विजाभ्यां हि रुषा विमुक्तम्॥ 7.54.19॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुःपञ्चाशः सर्गः॥